मामुवाच युवाभ्यां तत्प्रवक्ष्ये विश्वभूतये ॥
रामारामं घनश्यामं गोविन्दं गोपतिप्रियम् ।
वन्दे गोपं गोपगोपीभावितं भवगोष्पदम् ॥
गोमातुर्यानि नामानि गोव्रतैः सद्भिरादृतैः ।
गीतानि गीयमानानि तानि गायामि भूतये ॥

विनियोगः -
ॐ । अस्य श्रीगोसहस्रनामस्तोत्रमन्त्रस्य जगद्गुरुरामानन्दाचार्य
स्वामिरामभद्राचार्य ऋषिरनुष्टुप्छन्दो गौर्देवता गौविन्दी बीजं
गवेन्द्रार्या कीलकं गौः शक्तिर्गोमातुः प्रसन्नतार्थं पाठे विनियोगः ।

अथ स्तोत्रम् ।
ॐ गौर्गौविन्दी गवेन्द्रार्या गवीशा गोपगोपिता ।
गोजा गोदा गविप्रार्थ्या गवेड्या गोपतिप्रिया ॥ १॥

गोपा गोपालिका गोपी गोपीथा गोपदार्कगुः ।
गोमयी गोमती गव्यदोग्ध्री गोमा गविस्तुता ॥ २॥

गोपहूता गोपवन्द्या गोपगीता गवार्चिता ।
गोविन्दपालिता गोष्ठा गोप्रिया गोमयामृता ॥ ३॥

सर्वदेवमयी देवी दिव्याङ्घ्रिर्दिव्यभा द्युगुः ।
दिव्यरूपा दिव्यमाल्या दिव्यगन्धा द्युधृग्द्युभुक् ॥ ४॥

सर्वश्रेष्ठा सर्वतीर्था सर्वपूज्या समप्रिया ।
शमा शान्ता शुचिः स्निग्धा शुभ्रा सुभ्रूः स्वभूः स्वगुः ॥ ५॥

कल्याणी कामदा काम्या कामगा कामधुक्क्षुधुक् ।
कोष्णदुग्धा कुजा कावीकीर्तिता कीर्तिवर्धिनी ॥ ६॥

माधवी माधवप्रेष्ठा मा मान्या माधवप्रिया ।
मानुता मानिता मेष्टा महिता महिमस्थिता ॥ ७॥

बन्धुरा बन्धुदा बन्धुर्बान्धवी बन्धुगाऽवधूः ।
वन्दिता वाग्वृषवधूर्वन्दारुर्दारवी द्रुमा ॥ ८॥

चारुरूपा चारुशृङ्गी चारुशोभा सुचारुगुः ।
चारुवत्सा चारुखुरा चारुगा चारुसुस्तनी ॥ ९॥

हृतिर्हेतिर्हुतिः पूतिः प्रीतिः प्राप्तिः सृतिः क्षितिः ॥ ३७॥

बला बलवती बल्या बलीवर्दप्रसूतिका ।
बलिप्रिया बलिभुजा बलितेजा बलिस्तनी ॥ ३८॥

बलानुजनुता नाम्या नम्रा नम्रप्रतोषिणी ।
नम्रस्तनी नम्रगतिर्नम्रशृङ्गी सनम्रका ॥ ३९॥

कम्रकान्तिः कम्रमहा कम्रा कम्रशिरोरुहा ।
कम्रस्वरा कम्रगात्री कम्रमूर्धा सुकम्रदृक् ॥ ४०॥

कान्ता कान्तालका कन्तुः कन्ता कन्धिः सुकामदा ।
काक्षी कञ्जाम्बिका कञ्जा कञ्जनाभिः कका कुका ॥ ४१॥

भूमिपा भूमिजापूज्या भूमिष्ठा भूमिपावनी ।
भूमिपेष्टा भूमिमयी भूमिभृद्भूमिभाविनी ॥ ४२॥

भूमा भूमनता भौमी भौमभा भौमदोषहा ।
भूमिभारहरी भूमिपापहृद्भूमिभूषणा ॥ ४३॥

भूतिर्भूतजनिर्भाव्या विभूतिर्भूतभावनी ।
भूतात्मा भूतजननी भूतसौख्या विभूतिदा ॥ ४४॥

मङ्गल्या मङ्गलमुखी माङ्गली मञ्जुमङ्गला ।
मङ्गलेहा माङ्गलिकी मङ्गलात्मा सुमङ्गला ॥ ४५॥

मञ्जुर्मञ्जुतनुर्बभ्रूर्मञ्वीहा मञ्जुलस्तनी ।
मञ्जुदुग्धा मञ्जुदधिर्मञ्जुसर्पिः सुमञ्जुला ॥ ४६॥

मधुर्मधुमयी माध्वी माध्वीका मधुदोहिनी ।
मधुसूर्मधुदा मध्वजननी मधुहृत्प्रिया ॥ ४७॥

मधुरा मधुरालापा माधुरी मधुरामयी ।
मधुराभा सुमधुरा मधुरश्रुर्मधुव्रता ॥ ४८॥

मन्मथघ्नी मदकरी मदनद्विण्मदालसा ।
माद्यन्ती मद्यशमनी मदनेशपतिस्तुता ॥ ४९॥

हरित्प्रिया हरिज्जग्धी हरिकान्तिर्हरिप्रदा ।
हरिषेणा हरिमती हरिहासा हरिस्पृहा ॥ ५०॥

